International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(1): 45-47
© 2017 IJSR
www.anantaajournal.com
Received: 03-11-2016
Accepted: 19-12-2016

**दीपक कालिया**
ज़ाकिर हुसैन दिल्ली कॉलेज (प्रातः)
दिल्ली विष्वविद्यालय, दिल्ली, भारत

**Corresponding Author:**
**दीपक कालिया**
ज़ाकिर हुसैन दिल्ली कॉलेज (प्रातः)
दिल्ली विष्वविद्यालय, दिल्ली, भारत

# संस्कृतस्य एवं हिमाचलीभाषायाः भाषाशास्त्रीयावलोकनम्

## दीपक कालिया

**सारांश**
संस्कृतं सर्वासां भाषाणां जननी मन्यते अतएव तासां सर्वासां भाषाणां संस्कृतेन सह संबंन्धः दरीदृष्यते। आधुनिकभारतीय–आर्यभाषासु "पहाड़ी" इति नाम्ना भाषा पर्वतीयप्रदेषस्य वर्तते। अस्याः तिस्रः उपभाषाः सन्ति– पष्चिमी पहाड़ी, मध्यपहाड़ी, पूर्वीपहाड़ी। हिमाचलप्रदेशस्य भाषा "पष्चिमी पहाड़ी" इति अस्ति। हिमाचलीपर्वतीयानां विभाषाणां स्रोतः शौरसेनीअपभ्रंश मन्यते यतोहि शौरसेनी अपभ्रंषे यथा श् ष् वर्णयोः उच्चारणं 'स', ऋ इति स्वरस्य अनुनासिक रूपं नास्ति एवं 'उ' ध्वनेः बहुलता वर्तते तथैव पर्वतीयोपभाषासु अपि दृष्यते। भरतनाट्यषास्त्रेऽपि वर्णितम्–
हिमवस्सिन्धुसौवीरान् येडन्यदेषान् समाश्रिता।
उकार बहुलां तेषु नित्यं भाषा प्रयोजयेत।।
अस्मिन् शोधपत्रे अनयोः द्वयोः भाषायोः भाषाषास्त्रीयावलोकनम् ध्वनिपरिर्वतन–रूपपरिवर्तन–वाक्यरचनादृष्ट्याकृतम। परिणामतः एतत् परिलक्ष्यते यत् किंचित् उच्चारणभिन्नतासत्यपि हिमाचलीभाषा तु संस्कृतस्य एव प्रतिरूपा अस्ति।

**मुख्य शब्दः** वर्णागम, वर्णविपर्यय, रूपपरिवर्तन कर्तृप्रधाना, सधोषीकरण, अधोषीकरण

## प्रस्तावना
आधुनिकभारतीय–आर्यभाषासु "पहाड़ी" इति नाम्ना भाषा पर्वतीयप्रदेषस्य वर्तते। अस्याः तिस्रः उपभाषाः सन्ति– पष्चिमी पहाड़ी, मध्यपहाड़ी, पूर्वीपहाड़ी चेति। हिमाचलप्रदेषे या भाषा सा "पष्चिमी पहाड़ी" इति अस्ति। हिमाचलीपर्वतीयानां विभाषाणां स्रोतः शौरसेनीअपभ्रंश मन्यते। प्रदेषे यत्र यत्र शौरसेनी अपभ्रंषभाषायाः प्रसारः अभवत् तत्र भौगोलिक परिस्थितिभिः इयम् प्रभाविता; सज्जाता। पर्वतीयक्षेत्रेषु प्राप्ते सति पुरातन कोल–किरात–किन्नरप्रभृतिमि; भाषाभिः सम्पर्केण अपि प्रभावितेयम्। मूलतष्च केवलं एके सत्यपि अस्य क्षेत्रानुसारं विभिन्नाः विभाषाः जाताः। काँगड़ाक्षेत्रे काँगड़ी चम्बाक्षेत्रे चम्बयाली, सिरमौर क्षेत्रे सिरमौरी, कुल्लुक्षेत्रे कुलवीं, मण्डीक्षेत्रे मण्डयाली, सोलन क्षेत्रे बाघटी भाषायाः प्रयोगः भवति। भाषाषास्त्रीयावलोकनस्य त्रयः मुख्यबिन्दवः सन्ति– ध्वनिपरिवर्तनम्, रूपपरिवर्तनम्, वाक्यरचना च।

## ध्वनिपरिवर्तनम्
ध्वनिपरिवर्तनाधारे एव भाषायाः स्वरूपं परिवर्तते। केषुचित् शब्देषु नूतनध्वनीनाम् आगमः भवति, केषुचित् शब्देषु च लोपः, कुत्रचित्, शब्देषु ध्वनेः स्थानपरिवर्तनं जायते। कुत्रचित् विभिन्नाः ध्वन्यः समानाः जायन्तेः कुत्रचित् तु समानाः ध्वन्यः भिन्नाः। अनेकेषु स्थानेषु ह्रस्ववर्णस्य स्थाने दीर्घः, दीर्घवर्णस्य स्थाने ह्रस्वः, घोषवर्णः, अल्पप्राणस्य ध्वन्यः प्राप्यन्ते। एवं अनेकरूपेष्वपि ध्वनिपरिवर्तनं दृष्यते। केनचित् आचार्येण निरूक्तस्य परिभाषां कुर्वन् प्रकारान्तरेण ध्वनिपरिवर्तनस्य दिषाम् उल्लेखः एवमेव कृतः

> वर्णागमो वर्णविपर्ययष्च द्वौ चापरौ वर्ण विकारनाषौ।
> धातोस्तदर्थातिषयेन योगस्तदूच्यते पंचविधं निरूक्तम्।।

यास्ककृतनिरूक्तस्य द्वितीये अध्याये प्रथमपादेऽपि ध्वनिपरिवर्तनस्य दिषाम् संकेतः एवम् अस्ति–
"अथाप्यस्तोर्निवृतिस्थानेष्वादिलोपो भवति–स्तसन्तीति। अथाप्यन्तलोपो भवित– गत्वा गतनिति। अथाप्युपधा लोपो भवति जग्मुतुः जग्मुः इति।"

मुनिपतंजलिना अपि महाभाष्ये ध्वनिपरिवर्तनस्य संकेतः अनेक वार्तिकेन दत्तः–
वर्णव्यत्ययापायोपजनविकारेभवर्थदर्षनात्। (प्रथमोऽध्यायः नवम पादः द्वितीय आह्निकः)

संस्कृतस्य हिमाचलीयभाषाणां च ध्वनिपरिवर्तनम् एवम् अस्ति यथा – **हिण्ड्** (सं.) – अण्डणा, अत्र हकारस्य उच्चारणं अ एवं 'ण' वर्णस्य आगमः
नी (सं.) – नीणा, अत्र 'ण' वर्णः आगतः। एवं च जटा – झाटा, विष् – विषटा आदयः अनेके शब्दाः लभन्ते।
वर्णलोपः अपि दृष्यते यथा – ह्यः (सं.) – हि, अत्र 'य' वर्णस्य लोपः, नितराम् (सं.) – निरा, नित्य (सं.) – नित्त, परह्यः (सं.) – परैः, गृहम् (सं.) – गिह, निबन्धन (सं.) – बनण, उपद्रवी (सं.) – पद्रवी, नवनीत (सं.) – नौणी, अगे (सं.) – गाँ, पुरोहितः (सं.) – परोत, बहुकरी (सं.) – बौंकरी, जातकः (सं.) – जागत, निपीड् (सं.) – पीड़ना
अत्र वर्णविपर्ययःसमीकरणविषमीकरणयोः उदाहरणानि अपि प्राप्यन्ते यथा – अग्रे (सं.) – अग्गे,
छिन्द् (सं.) – छिन्न, कनिष्ठः (सं.) – कन्नी, सौकर्यम् (सं.) – सौक्रवा, अक्षरम् (सं.) – अक्खर, दक्षिणम् (सं.)– दक्खण, पक्षे (सं.) – वक्खे, चाणूर (सं.) – चान्नो, पृष्ठम् (सं.) – पिट्ठ, तप्तम् (सं.) – तत्ता, रात्रौ (सं.) – रात्ति, सर्वतः (सं.) – सबती, लक्षणम् (सं.) – लक्ष्छण, गो (सं.) – गा, ग्राम (सं.) – ग्रां, ऊन (सं.) – ऊणा।
मात्राभेदेनांपि ध्वनिपरिवर्तनं भवित – निद्रा (सं.) – निंदर, बलदः (सं.) – बल्द, परोक्षम (सं.) – परोक्खा, पत्रम् (सं.) – पत्तर, मित्रम् (सं.) – मित्तर, त्रिकालः (सं.) – तरकाल, स्वर्गः (सं.) – सुरग।
सघोषीकरणमघोषीकरणं संधिरपि केषुचित् शब्देषु लभते – शकुन (सं.) – सौगण, शाकम् (सं.) – साग, शोधनम् (सं.) – सुदाणा, षिखिरम् (सं.) – सिकर, साकम् (सं.) – सौग, जनित्री (सं.)– जणदी, शोकः (सं.) – सोग, भाण्ड् (सं.) – पाण्ड्डे, धनम् (सं.) – तन्न, धर्मः (सं.)– तरम, झटिति (सं.) – चट्ट, ध्वलम् (सं.)– तौल।
एवम् संधिपरिवर्तनमपि लभते – देवलायः (सं.) – दुआला, पवनः (सं.) – पौण, कालेष्वरः (सं.) – कलेसर, विष्वेष्वरः (सं.) – बिसेसर आदयः।

**रूपपरिवर्तनम्ः–**
अस्मिन् पदानां स्वरूपविषये विचारः क्रियते। यथा ध्वनिपरिवर्तनं तु केवलु एकस्यां विषिष्टध्वन्यां भवित परं रूपपरिवर्तनेन तु सम्पूर्णपदमेव प्रभावितं भवित। कानिचित् उदाहरणानि सन्ति–
**सिंच्** (सं.) – सगणा – सः क्षेत्रम् सिंचति – सै खेत्तर सगादा।
**दु** (द्रा) (सं.) – दुड़कणा – जातकःद्राति – जागत दुड़कादा।
**नी** (सं.) – नीणा – रामेण सीता नीता – रामे सीता नीत्ति।
**सूङ** (प्राणी प्रसवे) (सं.) – सूणा – गो सूयते – गा सूआदी।
**रुच्** (सं.) – रुचणा – तुभ्यम् किं रोचते? – तिजो कि रुचदा?
**पृच्छ्** (सं.) – पुच्छणा – सर्वान् पृच्छ – सबना (जो) पुच्छ।
**खन्** (सं.) – खुणना – सः खनति – सै खुणादा।
**वस्** (सं.) – बसणा – सः गृहे वसति – सै घ्हरे बसदा।
**बुध्** (अवगमने) (सं.) – बुजणा – मानवाः बुध्यन्ते – माणू बुजादे।
**मिल्** (संगमे) (सं.) – मिलणा – मानवाः मिलन्ति – माणू मिलादे।
**वर्ध** (सं.) – बदणा – शीतंवर्धते – सीत बदादा।
**कृ** (विक्षेपे) (सं.) – किराणा – धान्याः किरनित – तान्न किरादे।
**कृ** (करना) (सं.) – करादा – तेन कृतम् – तिन्नी कित्ता।
**चिती** (संज्ञाने) (सं.) – समजादा – पुत्रः चेतति – पुत्तर चेतादा।
**धुक्ष्** (सं.) – तुक्खणा – समिधा धुक्षते – समिदा तुखादि।
**क्षाल्** (सं.) – छलणा – भाण्डानि क्षालयति – पाण्डयां छलादि।

**प्रत्ययान्त पदानि**

| **क्त्वा प्रत्यान्त** | **–** | कृत्वा – करिके |
|---|---|---|
| खादित्वा | – | खाइके / खाईकरी |
| गत्वा | – | जाईके / जाईकरी |
| लिखित्वा | – | लिखिके / लिखीकरी |
| पठित्वा | – | पढ़िके / पढ़ीकरी |

अत्र 'त्वा' स्थाने 'के' 'करी' वा प्रयुज्यते।
यथा हिन्दी भाषायां 'पढ़कर' इति शब्दस्य प्रयोगः 'पठित्वा' अर्थे भवति तथैव हिमाचलीयउपभाषासु 'पढ़ीकरी' भवति। 'के' इति शब्दस्य प्रयोगः अपि क्त्वार्थक अस्ति।

**तुमुन् प्रत्ययान्त**

| | | |
|---|---|---|
| कर्तुम | – | करने जो |
| पठितुम् | – | पढ़ने जो |
| लिखितुम् | – | लिखणे जो |
| खादितुम् | – | खाणे जो |
| हसितुम् | – | असणे जो |
| गन्तुम् | – | जाणे जो |

'तुम्' स्थाने 'जो' इति शब्दस्य प्रयोगः दृष्यते। एवं 'जो' शब्छ हिमाचलीयउपभाषसु

**क्तप्रत्ययान्त**

| | | |
|---|---|---|
| दत्तः | – | दित्ता |
| पूरितः | – | पूरिदा |
| कृतः | – | कित्ता |
| बद्धः | – | बद्या |

अत्र द्वयोः भाषयोः क्तप्रत्ययान्तशब्दाः समानाः।

**शब्दरूपाणि**
संस्कृते यस्मिन् अर्थे पुल्लिंग सप्तमीएकवचनान्तपदानि प्रयुज्यनते तस्मिन् एव अर्थे– हिमाचलीय–उपभाषासु विषेषतया कॉंगड़ीउपभाषायाम् अपि ते प्रयुज्यनते। यथा–
दिने (दिन में) – सः दिने किम खादति? – सै दिने कि खाँदा?
विदेषे (नगर में) – अयं नगरे वसति – एओ नगरे बसदा।
विदेषे (विदेष में) – रामः विदेषे पठति – राम विदेषे पढ़ादा।
मन्दिरे (मन्दिर में) – भक्तः मन्दिरे अस्ति – पगत मन्दिरे ऐ।

**वाक्यसंरचना–** यथा संस्कृतभाषा कर्तृप्रधाना न तथा हिमाचलीय–उपभाषाः। एषा तु क्रिया प्रधाना। क्रियानुसारमेव कर्तुः लिंगनिर्धारणं भवित। यथा–
सः (पुं.) खनति – सै खुणादा (पुं.)
सा (स्त्री.) खनति – सै खुणादी (स्त्री.)
संस्कृतभाषायां सः सा च कर्ता। सः पुल्लिंगः, सा च स्त्रीलिंगः। पर उपभाषायां खुणादा खुणादी च क्रियारूपम्। खुणादा शब्दः पुल्लिंगः खुणादि च स्त्रीलिंगः।
उपभाषायाम् 'उ' मात्रायाः विपुलप्रयोगः दृष्यते। यथा–

| | | |
|---|---|---|
| यदा | – | जदूँ |
| तदा | – | तदूँ |
| कदा | – | कदूँ |
| कुत्र | – | कुतु |
| यत्र | – | जित्थू |
| तत्र | – | ओत्थू |
| पट | – | पट्टू |
| घण्टा | – | कण्टू |
| टोपिका | – | टोप्पू |

अन्ये शब्दाः अपि सन्ति– चग्गू, बोरु, रस्यालु, काङू, सुत्थणु, कुआङू, दत्यालु, संजयालु, रेङू, पटुरु।
भरतनाट्यषास्तेऽपि वर्णितम्–
हिमवत्सिन्धुसौवीरान् येन्यदेषान् समाश्रिता।
उकार बहुलां तेषु नित्यं भाषा प्रयोजयेत्। (नाट्यषास्त्र 17 / 56)
यथा संस्कृतभाषायाम् त्रीणि वचनानि, न तथा हि. उपभाषासु अत्र तु वचनद्वयम्– एकवचनम्, बहुवचनम् च–

| **एकवचन** | **–** | **बहुवचन** |
|---|---|---|
| सै करादा | – | ओ करादे |
| सै करादी | – | ओ करादियाँ |
| आओं (अहँ) करादा | – | असाँ करादे |
| अओं (अहँ) करादी | – | असाँ करादियाँ |

कानिचित् संस्कृतपदानि एवम् उच्चार्यन्ते–

| | | |
|---|---|---|
| शिवदेवालयः | – | सिवदुआला |
| अवतारः | – | तुआर |
| बहुकरी | – | बौंकरी |
| सोमवासरः | – | सुआर |
| यज्ञः | – | जग्ग |
| यक्षः | – | जक्ख |
| यात्रा | – | जात्तर |
| धर्षणम् | – | कस्णा |
| होलाष्टक | – | लुआटक |

**निष्कर्षतः** हिमाचलीयभाषायां वर्णानाम् उच्चारणम् एवम् भवति–

| | | |
|---|---|---|
| ह | – | अ |
| य | – | ज |
| क्ष | – | क्ख |
| ष, श | – | स |
| ल् | – | ळ |
| घ् | – | क् |
| व् | – | ब् |
| ध् | – | द् |
| त् | – | द् |

किंचित् उच्चारणभिन्नता सत्यपि देवभूमिहिमाचलप्रदेषस्य उपभाषाः देववाणीसंस्कृतस्य एव प्रतिरूपाः सन्ति। कैष्चित् अन्तःबाह्यकारणैः किंचित् परिवर्तनं भवति एव एतत् तु स्वभाविकम्।

**संदर्भाः**


1. Linguistic studies from the Himalaya being studies in the Grammar of fifteen Himalayan Dialects – by The Rev. T. Graname Bailey.
2. Himachal – Nature's Peaceful Paradise. Dr. S.S. Shashi – An 155D Publication (Page 192, Pahari Languaguage).
3. Linguistic Survey of India Griarson. Publisher – Motilal Banarsidass, Delhi, Year 1967
4. भारतीय–आर्य भाषा– अनुवादक– डा. लक्ष्मीसागर वार्ष्णेय (ज़्यूल ब्लॉख़ कृत), प्रकाशक– हिन्दी समिति, सूचना विभाग, उत्तर प्रदेष, प्रथम संस्करण, 1963 ई.।
5. 5. प्राचीन भारतीय वैयाकरणो के ध्वन्यात्मक विचारो का विवेचनात्मक अध्ययन– डा. सिद्धेष्वर वर्मा *अनुवादक*– डा. देवीदत्त शर्मा, हरियाणा हिन्दी ग्रन्थ अकादमी, प्रथम संस्करण, 1973 ई.।
6. Gazetteer of the Chamba State 1904 Punjab States Gazetteer VIL. XXII A Indus Publishing Company, New Delhi, Reprinted 1996
7. भरतनाट्यषास्त्र– अनुवाद सम्पादक– रेखा प्रसाद द्विवेदी, आर्यनबुक्स इंटरनेषनल, नई दिल्ली 12005 पृष्ठ संख्या– 413
8. हिमाचली लोकोक्ति संग्रह (प्रथम भाग), भाषा एवम् संस्कृति विभाग, हि.प्र. षिमला, प्रथम संस्करण, अगस्त 1985, संकलन एवं सम्पादन– एम.आर. ठाकुर, जगदीष शर्मा डा. बंषीराम शर्मा, सुदर्षन डोगरा, तुलसी रमण, प्रकाशक– श्री निवास जोषी, निदेषक, भाषा एवं संस्कृति विभाग, हि.प्र., शिमला।